# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| कक्षा- शास्त्री-३ (SEM-5) | प्रश्नपत्र-४ | गुणाः - ७० |
|---|---|---|
| विषयः-कर्मकाण्डम् | OE355 | समयः - ११ तः ०२ |
| दिनाङ्कः - २८/११/२०१६ | सन्दर्भग्रन्थः - ब्रह्मनित्यकर्मसमुच्चयः पुराणोक्तकर्मदर्पणम्, कर्मकौशलम् | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ कयोः अपि द्वयोः विवेचनं कुरुत ।** **०८**

१. ब्रह्मपूर्णपात्रदानम् ।

२. गुग्गलहोमः ।

३. कुशकण्डिकाप्रयोगे पात्रासादनविधिः ।

**प्र-२ कस्यचित् एकस्य निरूपणं कुरुत ।** **०८**

१. कुशकण्डिकामहत्त्वम् ।

२. कुशकण्डिकाविधिं वर्णयत ।

**प्र-३ एकस्य विषये टिप्पणी लेख्या ।** **०२**

१. अग्रेरग्रं मूलेर्मूलम् ।

२. पञ्चगव्यकरणम् ।

**प्र-४ द्वयोः एकवाक्येन उत्तरं लेख्यम् ।** **०२**

१. परिस्तरणं कुत्र विसृजेत् ?

२. कुशकण्डिकायां कस्य आज्ञया सर्वाः क्रियाः क्रियन्ते ?

३. सम्मार्जनकुशाः कति भवन्ति ?

४. ब्रह्मस्थापनं कुत्र भवति ?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ कयोरपि द्वयोः व्याख्यात्मकं विवेचनं कुरुत ।** **०८**

१. योनिनाभिपूजनमन्त्रौ ।

२. कुण्डस्याग्रे भूमिकूर्मानन्तावाहनमन्त्रान् लिखत ।

३. कुण्डमध्ये नैऋत्यकोणे वास्तुपूजनमन्त्रश्लोकान् च लिखत ।

**प्र-६ द्वयोरेकस्य निरूपणं कर्तव्यम् ।** **०८**

१. यजमानानां ब्राह्मणानां च नियमान् लिखत ।

२. कुण्डे पञ्चभूसंस्कारपूर्वकाग्निस्थापनमन्त्राः लेख्याः ।

**प्र-७ कयोश्चित् द्वयोः विषये टिप्पणी विधेया ।** **०४**

१. विश्वकर्मापूजनम् ।

२. कुण्डपूजनम् ।

३. कुण्डप्रार्थना ।

४. अग्नेः गोत्रस्य मातुः पितुश्च नामानि लिखत ।

**प्र-८ केषामपि पञ्चानाम् एकैकवाक्येन उत्तरं लेख्यम् ।** **०५**

१. कुण्डस्य कस्मिन् कोणे भूम्यादिदेवतानाम् आवाहनं भवति ?

२. कुण्डपूजने प्रथममेखलायां कस्य देवस्य पूजनं भवति ?

३. कुण्डस्य रचयिता कः देवः ?

४. श्रोत्रियगृहात् स्वगृहाद्वा अग्निं कः आनयेत् ?

५. अग्नेः वामभागे कस्य स्थापना भवति ?

६. कुण्डमध्ये कः देवः विराजते ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ अधोलिखितेषु द्वयोः उत्तरं लेख्यम् ।** **०८**

१. रुद्रयागे प्रधानदेवतानां होमं यथाशास्त्रं व्याख्यायताम् ।

२. चण्डीयागे प्रधानदेवतानां होमक्रमं यथाशास्त्रं लिखत ।

३. महाविष्णुयागे प्रधानदेवतानां होमं यथाशास्त्रं लिखत ।

**प्र-१० कस्यचिदेकस्य निरूपणं कुरुत ।** **०८**

१. नवग्रहाणां नवफलहोमः ।

२. दशदिक्पालदेवतानां बलिदानविधिः ।

**प्र-११ द्वयोः विषये टिप्पणी लेख्या ।** **०४**

१. आधारहोमः ।

२. क्षेत्रपालमहाबलिः ।

३. श्रेयोदानम् ।

४. देवताविसर्जनम् ।

**प्र-१२ केचन पञ्च प्रश्नाः समाधेयाः ।** **०५**

१. बृहस्पतिः कस्मिन् देशोद्भवः ?

२. शुक्रस्य मुखं कस्यां दिशि भवति ?

३. अधिदेवतानां स्थापनं ग्रहाणां कस्मिन् भागे भवति ?

४. राक्षसाधिपतिः दिक्पालः कः ?

५. ऊर्ध्वस्थानं कस्य दिक्पालस्य अस्ति ?

६. लक्ष्मीहोममन्त्रं लिखत ।

७. पूर्वेशानयोः मध्ये कस्य दिक्पालस्य आवाहनं भवति ?